# Vyasaproktam Shiva Stotram

# व्यासप्रोक्तं शिवस्तोत्रम्

## Document Information

Text title : Vyasaproktam Shiva Stotram

File name : vyAsaproktaMshivastotram.itx

Category : shiva, mahAbhArata, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | droNaparva | adhyAya 173/20-39||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

# व्यासप्रोक्तं शिवस्तोत्रम्

रुद्राय शितिकण्ठाय कनिष्ठाय सुवर्चसे ॥ २०॥

कपर्दिने करालाय हर्यक्ष्णे वरदाय च ।
याम्यायाव्यक्तकेशाय सद्वृत्ते शङ्कराय च ॥ २१॥

काम्याय हरिनेत्राय स्थाणवे पुरुषाय च ।
हरिकेशाय मुण्डाय कृशायोत्तरणाय च ॥ २२॥

भास्कराय सुतीर्थाय देवदेवाय रंहसे ।
बहुरूपाय शर्वाय प्रियाय प्रियवाससे ॥ २३॥

उष्णीषिणे सुवक्राय सहस्राक्षाय मीढुषे ।
गिरिशाय प्रशान्ताय पतये चीरवाससे ॥ २४॥

हिरण्यबाहवे चैव उग्राय पतये दिशाम् ।
पर्जन्यपतये चैव भूतानां पतये नमः ॥ २५॥

वृक्षाणां पतये चैव अपां च पतये तथा ।
वृक्षैरावृतकायाय सेनान्ये मध्यमाय च ॥ २६॥

स्रुवहस्ताय देवाय धन्विने भार्गवाय च ।
बहुरूपाय विश्वस्य पतये चीरवाससे ॥ २७॥

सहस्रशिरसे चैव सहस्रनयनाय च ।
सहस्रबाहवे चैव सहस्रचरणाय च ॥ २८॥

शरणं प्राप्य कौन्तेय वरदं भुवनेश्वरम् ।
उमापतिं विरूपाक्षं दक्षयज्ञनिबर्हणम् ।
प्रजानां पतिमव्यग्रं भूतानां पतिमव्ययम् ॥ २९॥

कपर्दिनं वृषावर्तं वृषनाभं वृषध्वजम् ।
वृषदर्पं वृषपतिं वृषशृङ्गं वृषर्षभम् ॥ ३०॥

वृषाङ्कं वृषभोदारं वृषभं वृषभेक्षणम् ।
वृषायुधं वृषशरं वृषभूतं महेश्वरम् ॥ ३१॥

महोदरं महाकायं द्वीपिचर्मनिवासिनम् ।
लोकेशं वरदं मुण्डं ब्रह्मण्यं ब्राह्मणप्रियम् ॥ ३२॥

त्रिशूलपाणिं वरदं खड्गचर्मधरं प्रभुम् ।
पिनाकिनं खण्डपरशुं लोकानां पतिमीश्वरम् ।
प्रपद्ये शरणं देवं शरण्यं चीरवाससम् ॥ ३३॥

नमस्तस्मै सुरेशाय यस्य वैश्रवणः सखा ।
सुवाससे नमो नित्यं सुव्रताय सुधन्विने ॥ ३४॥

स्रुवहस्ताय देवाय सुखधन्वाय धन्विने ।
धन्वन्तराय धनुषे धन्वाचार्याय धन्विने ॥ ३५॥

उग्रायुधाय देवाय नमः सुरवराय च ।
नमोऽस्तु बहुरूपाय नमश्च बहुधन्विने ॥ ३६॥

नमोऽस्तु स्थाणवे नित्यं सुव्रताय सुधन्विने ।
नमोऽस्तु त्रिपुरघ्नाय भगघ्नाय च वै नमः ॥ ३७॥

वनस्पतीनां पतये नराणां पतये नमः ।
अपां च पतये नित्यं यज्ञानां पतये नमः ॥ ३८॥

पूष्णो दन्तविनाशाय त्र्यक्षाय वरदाय च ।
नीलकण्ठाय पिङ्गाय स्वर्णकेशाय वै नमः ॥ ३९॥

इति महाभारते द्रोणपर्वणि १७३ अध्यायान्तर्गतं
अर्जुनाय व्यासप्रोक्तं शिवस्तोत्रं सम्पूर्णम् ।

महाभारत । द्रोणपर्व । अध्याय १७३/२०-३९॥

mahAbhArata . droNaparva . adhyAya 173/20-39..

Proofread by PSA Easwaran

*Vyasaproktam Shiva Stotram*

pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*